# Govindaraja Prapatti

# ગોવિન્દરાજપ્રપત્તિઃ

## Document Information

Text title : govindarajaprapatti

File name : govindaprapatti.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Proofread by : Sridhar Seshagiri seshagir at engineering.sdsu.edu

Description-comments : Hymn to God of Tirupati

Latest update : October 1, 2001

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 28, 2022

*sanskritdocuments.org*

# ગોવિન્દરાજપ્રપત્તિઃ

યશ્શ્રૈકશૈલનિકટે કમલાપુરીશ-
ગોવિન્દરાજપદયોરકરોત્ પ્રપત્તિમ્ ।
તં વાદિભીકરગુરોશ્ચરણં પ્રપદ્યે
પાત્રં ગુરું વરવરં પરમં ગુરૂણામ્ ॥ ૧॥

શ્રીમન્ નિદાન જગતાં નિખિલાણ્ડજાત-
નિર્વાહશક્તિમુખદિવ્યગુણૈકતાન ।
અત્યન્તભોગ્યનતદોષ નિરસ્તદોષ
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૨॥

રેખારથાઙ્ગસરસીરુહવજ્રશઙ્ખ-
ચ્છત્રાઙ્કુશપ્રભૃતિમઙ્ગલચિહ્નગર્ભૌ ।
સંસારતાપહરણે નિપુણૌ નતાનાં
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૩॥

પશ્યત્સુ સાન્દ્રભયકૌતુકમર્ભકેષુ
પ્રૌઢેષુ સત્સુ કૃતકૃત્યપરાયણેષુ ।
વિધ્વંસિતોર્ધ્વશકટાવપિ બાલભાવે
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૪॥

આલમ્બ્ય બાહુયુગલેન કુમારભાવે
ગાઢં કરાઙ્ગુલિયુગં કિલ નન્દપત્ન્યાઃ ।
અભ્યસ્યમાનદશચઙ્ક્રમણાભિરામૌ
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૫॥

ઘોષાઙ્ગનાકરસરોરુહતાલનાદ-
સઙ્ગીતસમ્પદનુરૂપમનોજ્ઞનૃત્તૌ ।
માણિક્યનૂપુરમરીચિકૃતાઙ્ગલેપૌ
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૬॥

કુટ્ટાકતામુપગતૌ સરસઃ પ્રસહ્ય
મધ્યેસરિત્સલિલમુદ્ધતકાલિયસ્ય ।
તત્સુન્દરીનયનનન્દનસંનિવેશૌ
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૭॥

વાસાંસિ દેહિ તવ કૃષ્ણ વશંવદાના-
મસ્માકમાકુલધિયામિતિ ગોપકન્યાઃ ।
ઉદ્દિશ્ય યૌ વિદધુરઞ્જલિમા પ્રસાદાદ્
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૮॥

ગોરક્ષણે કિલ બભૂવ યદીયરેણુ-
રક્રૂરમસ્તકમણેઃ સરણિં સમેતઃ ।
તાવદ્ભુતાવનુપમાવતિપાવનૌ તે
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૯॥

મલ્લાવહે મધુરયા મધુરાઙ્ગનાનાં
ફુલ્લારવિન્દદલતલ્લજલોચનાનામ્ ।
વાણ્યા પ્રશંસિતપરાર્ધ્યગતિપ્રકારૌ
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૦॥

કંસં નિપાત્ય કનકાસનતઃ પૃથિવ્યા-
મુદ્ધૃત્ય સાગસમનાગસમુગ્રસેનમ્ ।
રાજ્યેઽભિષિચ્ય વિનિવારિતભૂમિભારૌ
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૧॥

દુર્યોધને દુરભિમાનિનિ દુર્ભગાણા-
મગ્રેસરે ભજતિ તે શિરસઃ પ્રદેશમ્ ।
ધન્યેન યન્નિકટતઃ સ્થિતમર્જુનેન
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૨॥

સારથ્યવેષસમલઙ્કૃતપાણ્ડુસૂનો-
ર્યુદ્ધાઙ્ગણોજ્જ્વલરથાઞ્ચલસંનિવેશૌ ।
સાન્દ્રેન્દ્રનીલપરિભાવુકભવ્યરૂપૌ
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૩॥

ભક્ત્યા પ્રસન્નહૃદયેન ધનઞ્જયેન

યત્રાર્ચિતાનિ કુસુમાનિ શિવોત્તમાઙ્ગે ।
સાક્ષાત્કૃતાનિ સહસાદ્ભુતવૈભવૌ તૌ
ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૪॥

અસ્મદ્ગુરુપ્રભૃતિભિઃ કમલાવસાનૈ-
રાદર્શિતૌ કરુણયા મમ દેશિકેન્દ્રૈઃ ।
સત્ત્વોત્તરૈઃ સકલજીવદયાપરૈસ્તૈ-
ર્ગોવિન્દરાજ ચરણૌ શરણં પ્રપદ્યે ॥ ૧૫॥

અસ્માત્પિતામહમશેષગુણાભિરામ-
માચાર્યરત્નમયિ વાદિભયઙ્કરાર્યમ્ ।
ગોવર્ધનાદ્રિધૃતિધારિતગોપ વીક્ષ્ય
ગોવિન્દરાજ મમ દુર્લપિતં ક્ષમસ્વ ॥ ૧૬॥

। ઇતિ શ્રીગોવિન્દરાજપ્રપત્તિઃ સમ્પૂર્ણા ।

Encoded and proofread by Sridhar Seshagiri seshagir at engineering.sdsu.edu
The author was the grandson of VAdibhayamkarAchAryA,
as is stated in the last verse; nothing more is known of
him, even his name. The stotra is on the God at Tirupati, and is on the
model of the well-known venkaTeshvaraprapatti.

*Govindaraja Prapatti*

pdf was typeset on July 28, 2022

Please send corrections to *sanskrit@cheerful.com*